श्रीगणेशाय नमः ॥ ॥ अथ गायत्रीपुरश्चरणविधिः ॥
भूयस्त्वक्षरगायत्रींसंयतात्मकोजप्त्वा ॥ जुहुयात्पाय
सतिलघृतदूर्वाभिर्दुग्धचरुसमिद्भिश्च ॥ अस्यार्थः ॥
वटाश्वत्थोदुंबरार्कसमिद्भिः ॥ एकैकंत्रिसहस्रंमंत्री स्वाभीष्ट
सिद्धयेमुक्त्यै ॥ अक्षरसहस्रसंख्यंमुख्येतरैःकेवलैर्जुहुयात् ॥
दुरितोच्छेदनविषयेदीर्घायुषेचविशदमतिः ॥ आयुष्कामो
जुहुयात्पायसहविराज्यकेवलाज्यैश्च ॥ दूर्वाभिःसतिलाभिः
सर्वास्त्रिसहस्रकंमंत्री ॥ अथात्रिमधुसहितैरर्कपर्णैर्जुहुयात्सरोरु
हैर्युतं ॥ नष्टश्रीरपिभूयोभवतिमनोज्ञंमंदिरंलक्ष्म्याः ॥अन्ना
द्यर्थंतैरपिपालाशैर्ब्रह्मवर्चसेजुहुयात् ॥ सर्वैरेतैर्जुहुयात्सर्वफ
लावाप्त्यैद्विजेश्वरोमतिमानिति ॥ अक्षरसमसंख्यानिलक्षा

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

णियस्यांक्रियायांचतुर्विंशतिरितियावत् ॥ घृततिलात्मकं
हविर्मुक्त्यैइत्यारभ्यचेत्यंतंएकंवाक्यं ॥ विशदमतिः ध्यान
जपाभ्यांशुद्धचरित्रइत्यर्थः ॥ हविराज्यात्मकमेकंहविः ॥
ओदनमन्नाद्यर्थमपीतिभिन्नक्रमेपि॥पालाशैःपुष्पैः॥ व्याहृ
तित्रयसंयुक्तांगायत्रींदीक्षितोजपेत् ॥ तत्त्वलक्षाविधानेनभि
क्षाशीविजितेंद्रियः ॥ क्षीरोदनातिलान्दूर्वाःक्षीरद्रुमसमिद्वरा
न॥ पृथक्सहस्रत्रितयंजुहुयान्मंत्रसिद्धये॥तत्त्वसंख्यासहस्रा
णिमंत्रवज्जुहुयात्तिलैः ॥ सर्वपापविनिर्मुक्तोदीर्घमायुःसविंद
ति।आयुषेसाज्यहविषाकेवलेनाथसर्पिषा ॥दूर्वायुतैस्तिलैर्मं
त्रीजुहुयात्त्रिसहस्रकं।चरुणाज्यैस्त्रिमध्वाक्तैर्जुहुयादयुतंततः॥
महालक्ष्मीर्भवेत्तस्यषण्मासान्नात्रसंशयः। ब्रह्मश्रियेचजुहुया

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

त्प्रसूनैर्ब्रह्मवृक्षजैः ॥ ब्रह्मवृक्षःपलाशः ॥ तत्रापिमध्वाक्तैरित्य
नुषंगः ॥ अथप्रयोगः ॥ तत्रादौदेशकालौसंकीर्त्यकरिष्यमा
णगायत्रीपुरश्चरणाधिकारसिद्ध्यर्थंसमस्तपापक्षयार्थंचषड
ब्दंत्र्यब्दंवाअमुकप्रत्याम्नायेनअहमाचरिष्ये॥इतिवाततःअ
मुकशर्मणः करिष्यमाणगायत्रीपुरश्चरणांगत्वेनश्रीगायत्रीमं
त्रसिद्ध्यर्थंपंचदशप्रणवव्याहृतिपूर्वकंगायत्र्ययुतजपंकृत्वा
बृहदग्निविधाने ॥ गायत्रीमंत्रसिद्ध्यर्थंगायत्रींत्र्ययुतंजपेत् ॥
सर्वेषांवेदमंत्राणांसिद्ध्यर्थंलक्षकंजपेत्॥गायत्रींन्याससहितां
सप्तव्याहृतिसंपुटां॥त्र्ययुतंतुजपेत्पूर्वंगायत्रीसिद्धिदायतः॥
ओंभूः ॥ ओंभुवः ॥ ओंसुवः ॥ ओंमहः ॥ ओंजनः ॥ ओंत
पः ॥ ओंसत्यं ॥ एवंत्र्ययुतंजपंकृत्वासूक्तानिपठेयुः ॥ आ

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

पोहिष्ठा० ॥ एतोन्विंद्रेति० ॥ऋतंचसत्यं० ऋक् ॥स्वस्ति नोमिमीता० ॥स्वादिष्ठयेत्याद्याः पवमानःसुवर्जनः०सर्वश्च जपेत्॥प्रत्येकंदशवारंजपित्वा॥तत्सवितुरित्यस्यचऋचः॥ ऋषिं विश्वामित्रंतर्पयामि ॥ गायत्रीछंदसस्तर्पयामि॥सवि तारंदेवंतर्पयामि ॥ इतितर्पयित्वा॥रुद्रंनमस्कृत्य कद्रुद्राये त्यादिचत्वारिसूक्तानिसकृज्जपेत् ॥ ततः॥ सुमुहूर्तेदेशका लौसंकीर्त्यअमुकशर्मणः ममइहजन्मनिजन्मांतरेषुचमनोवा क्कायकर्मभिःकृतसमस्तपापक्षयार्थं पुत्रपौत्रधनधान्याभिवृ द्ध्यर्थंचतुर्विधपुरुषार्थसिद्ध्यर्थंचश्रीपरमेश्वरप्रीत्यर्थंसप्रण वव्याहृतिपूर्वकगायत्रीमंत्रेणचतुर्विंशतिलक्षसंख्यात्मकंगाय त्रीमंत्रजपपुरश्चरणाख्यं कर्म करिष्ये॥ तदंगत्वेनगणेशपूज

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

नंस्वस्तिपुण्याहवाचनं मातृकापूजनंनांदीश्राद्धंचकरिष्ये॥
सवितृदेवताप्रीयतामितिविशेषः ॥ आचार्यादिवरणपक्षेवर
णानंतरंमधुपर्कादिभिःपूजयेन्नवा ॥ ततःस्वयंशुद्धदेशेकुशा
द्यासनेउपविश्यपवित्रपाणिराचम्यप्राणानायम्यदेवताःप्रार्थ
येत् ॥ सूर्यःसोमोयमःकालःसंधीभूतान्यहःक्षपाः ॥ पवनो
दिक्पतिर्भूमिराकाशंखेचरामराः ॥ ब्रह्मशासनमास्थायकुरु
ध्वमिहसन्निधिम्। ततोदेशकालौसंकीर्त्यश्रीपरमेश्वरप्रीत्यर्थं
जपसंख्यापरिपूरणार्थंविहितजपमहंकरिष्ये।तदंगभूतशुद्ध्या
दिन्यासान्करिष्ये ॥ पृथिव्यामेरुपृष्ठऋषिः ॥ सुतलंछंदः ॥
आदिकूर्मोदेवता ॥ आसनसिद्ध्यर्थेंजपेविनियोगः ॥ ओंपृ
थ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता। त्वचंधारयमांदेवि

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

पवित्रंकुरुचासनं ॥ कूर्मासनायनमः ॥ विमलासनायनमः॥ कमलासनायनमः ॥ आधारशक्त्यैनमः॥दुष्टद्रविणासनायनमः॥ नृसिंहायनमः ॥ रुद्रायनमः॥अष्टदिक्षुअक्षतान्निक्षिप्य ॥ आसनमभिमंत्र्य ॥ अपक्रामंतु०॥भूतमुच्चाटयेद्गुरु॥ असुरांतकायत्रिशूलायहुंफट् ओंह्रींअस्त्रायनमः ॥ इतिभूतमुत्सार्य ॥ पार्ष्ण्याघातत्रयंकृत्वा॥ ओंह्रः अस्त्रायफट्॥इतिमंत्रेणतालत्रयंकुर्यात् ॥ब्रह्मरंध्रगतेचंद्रमंडलेमृतवर्षिणीं ॥भवानींभूमिशुद्ध्यर्थंभावयेदमृतेश्वरीं ॥ ततस्तन्मौलिनिष्पंदसुधाकल्लोलवृष्टिभिः ॥ चिंतयेन्मनसात्मानंभूमिशुद्धिरियंभवेत्॥ततोदक्षिणनासापुटेनवायुमापूर्य॥लंवंरंयंहंइतिपंचभौतिकबीजानिकुंभकेकृतेसकृदावर्त्यवामनासापुटेनवायुंरेच

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

येत ॥ हृदिहस्तंनिधाय ओंहंसःसोहंहंसोहंसः ॥ त्रिःपठेत्॥
पंचदशसंस्कारसिद्ध्यर्थं पंचदशप्रणवावृत्तयःकार्याः ॥ अं
आंइंईंउंऊंऋंॠंऌंॡं इत्यादिक्षकारांतंपठेत्।अंजल्यंतर्गताः
मातृकाविभाव्यमूर्धादिपादांताः त्रिर्न्यसेत् ॥ गायत्रीमंत्रे
णकरशुद्धिंकृत्वा ॥ मणिबंधेप्रकोष्ठेचकूर्परेकरयोस्तथा ॥ त
त्पृष्ठेचतदग्रेचकरशुद्धिरुदाहृता ॥ ओंप्रणवस्यपरब्रह्मऋषिः
दैवीगायत्रीछंदः।परमात्मादेवता ॥ व्याहृतीनांजमदग्निभर
द्वाजभृगुगौतमकाश्यपविश्वामित्रवसिष्ठाऋषयः ॥ गायत्र्यु
ष्णगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छंदांसि।अग्निवायुसूर्य
बृहस्पतिवरुणेंद्रविश्वेदेवादेवताः ॥ न्यासेविनियोगः॥ओंभूः
अंगुष्ठाभ्यांनमः ॥ ओंभुवःतर्जनीभ्यांनमः ॥ ओंसुवः मध्य

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

माभ्यांनमः ।। ओंतत्सवितुर्वरेण्यंअनामिकाभ्यांनमः ।। ओं
भर्गोदेवस्यधीमहिकनिष्ठिकाभ्यांनमः ।। ओंधियोयोनःप्रचो
दयात् करतलकरपृष्ठाभ्यांनमः ।। एवंहृदयादि ।। अथऋ
षिन्यासः।।ओंविश्वामित्रर्षयेनमः ।। शिरसेनमः ।। ओंगायत्री
छंदसेनमः ।। मुखायनमः ।। ओंसवितृदेवतायैनमः ।। हृद
यायनमः ।। ओंतत्सवितुर्ब्रह्मात्मने अंगुष्ठाभ्यांनमः ।।ओंवरे
ण्यंविष्णवात्मनेतर्जनीभ्यांनमः ।। ओंभर्गोदेवस्यरुद्रात्मनेम
ध्यमाभ्यांनमः ।। ओंधीमहीश्वरात्मनेअनामिकाभ्यांनमः ।।
ओंधियोयोनःसदाशिवात्मनेकनिष्ठिकाभ्यांनमः ।। ओंप्रचो
दयात्सर्वात्मनेकरतलकरपृष्ठाभ्यांनमः ।। एवंहृदयादि ।। अ
थन्यासः ।। ओंअंनमः नाभ्यैनमः ।। ओंआंनमःहृदयायनमः

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

॥ ओंइंनमः कंठायनमः ॥ ओंईंनमःमुखायनमः ॥ ओंउंनमः
ललाटायनमः ॥ ओंऊंनमःब्रह्मरंध्रायनमः ॥ ओंएंनमः अंगु
ष्ठाभ्यांनमः ॥ ओंऐंनमःतर्जनीभ्यांनमः ॥ ओंओंनमःमध्य
माभ्यांनमः ॥ ओंऔंनमः अनामिकाभ्यांनमः ॥ ओंअंनमः
कनिष्ठिकाभ्यांनमः । ओंअःनमःकरतलकरपृष्ठाभ्यांनमः॥
ओंएंनमः हृदयायनमः॥ओंऐंनमः शिरसे०॥ ओंओंनमःशि
खायै० ॥ ओंऔंनमःकवचा० ॥ ओंअंनमःनेत्रत्रयाय० ॥
ओंअःनमःअस्त्राय० ॥ ओंभूःपादाभ्यांनमः ॥ ओंभुवःजानु
भ्यांनमः॥ ओंसुवःकटिभ्यांनमः॥ ओंमहःनाभ्यैनमः ॥ ओं
जनःकंठायनमः ॥ ओंतपःवक्त्रायनमः ॥ ओंसत्यं ब्रह्मरंध्रा
यनमः॥ ओंतत्सवितुः० यात् ॥ कवचायहुं ॥ ओंआपः

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

गा० ६

शिरसेनमः ॥ ओंज्योतिःनेत्राभ्यांनमः ॥ ओंरसःजिह्वायैनमः
ओंअमृतंललाटायनमः ॥ ओंब्रह्महृदयायनमः।पुनः।ओंभूर्भु
वःसुवरों।शिखायैनमः। ओंभूः अंगुष्ठाभ्यांनमः ॥ ओंभुवः त
र्जनीभ्यांनमः ॥ ओंसुवःमध्यमाभ्यांनमः ॥ ओंमहःअनामि
काभ्यांनमः ॥ ओंजनःकनिष्ठिकाभ्यांनमः ॥ ओंतपः सत्यं
करतल० ॥ एवंहृदयादि ॥ ओंतत्सवितुः०अंगुष्ठाभ्यां० ॥
ओंवरेण्यंतर्जनीभ्यां०॥ ओंभर्गोदेवस्यमध्यमाभ्यां० ॥ ओं
धीमहिअनामिकाभ्यां० ॥ ओंधियोयोनःकनिष्ठिकाभ्यां०॥
ओंप्रचोदयात्करतलकरपृष्ठाभ्यां० ॥ एवंहृदयादि ॥ ओं
आपः अंगुष्ठिकाभ्यांनमः ॥ ओंज्योतिः तर्जनीभ्यां० ॥ ओं
रसःमध्यमाभ्यांनमः ॥ ओंअमृतंअनामिकाभ्यां० ॥ ओंब्र

पु० ६

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

ह्लकनिष्टिकाभ्यां० ॥ ओंभूर्भुवःसुवरोंकरतलकरपृष्टाभ्यांन
मः॥एवंहृदयादि ॥ ततःप्राणायामत्रयंकुर्यात् ॥ अथाक्षर
न्यासः ॥ ओंतत्नमः दक्षिणपादायनमः ॥ ओंत्संनमःवाम
पादाय०॥ ओंविंनमः॥दक्षिणजानवे०॥ओंतुंनमःवामजान
वे० ॥ ओंवंनमःदक्षिणोरवे० ॥ ओंरेंनमःवामोरवे०॥ओंणिं
नमः गुह्याय० ॥ ओंयंनमःनाभ्यै० ॥ ओंभंनमःशिरसे० ॥
ओंगोंनमःललाटाय० ॥ ओंदेंनमःदक्षिणनेत्राय० ॥ ओंवंन
मःवामनेत्राय०॥ओंस्यंनमःदक्षिणकर्णाय० ॥ ओंधींनमःवा
मकर्णाय० ॥ ओंमंनमःदक्षिणनासापुटाय०॥ ओंहिंनमःवा
मनासापुटाय० ओंधिंनमःवक्त्राय० ॥ ओंयोंनमःचुबुका
य० ॥ ओंयोंनमःकंठाय० ॥ ओंनःनमःदक्षिणबाहवे० ॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

ओंप्रंनमःवामबाहवे० ॥ ओंचोंनमःहृदयाय० ॥ओंदंनमःदं
तेभ्यो०॥ ओंयांनमःदक्षिणस्तनाय० ॥ ओंतंनमः वामस्त
नायनमः ॥ अथपदन्यासः॥ ओंतत्पादाभ्यां०॥ ओंसवि
तुःजानुभ्यां० ॥ ओंवरेण्यंकट्यै० ॥ ओंभर्गःनाभ्यैनमः ॥
ओंदेवस्यहृदयाय० ॥ओंधीमहिकंठायनमः॥ ओंधियःना
साग्रायनमः ॥ ओंयः चक्षुर्भ्यां० ॥ ओंनःललाटायनमः ॥
ओंप्रचोदयात्मूर्ध्नेनमः॥ ओंतत्सवितुर्ब्रह्मात्मनेहृ०॥ओंवरे
ण्यंविष्णवात्मनेशिरसे०॥ओंभर्गोदेवस्यरुद्रात्मनेशिखायै०
ओंधीमहीश्वरात्मनेकवचाय० ॥ओंधियोयोनःकालात्मनेने
त्रत्रयाय० ॥ ओंप्रचोदयात्सर्वात्मनेअस्त्राय० ॥ इतिषडंगं
कृत्वा॥ अथपादन्यासः ॥ ओंतत्सवितुर्वरेण्यंनाभ्यैनमः ॥ ७

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

ओंभर्गोदेवस्यधीमहि हृदयायनमः।ओंधियोयोनःप्रचोदया
त् कंठायनमः।अथध्यानं।शौंधायनमः।मंदाराह्वयरोचनांजन
जपार्काभैर्मुखैरिंदुमद्रत्नोद्यन्मुकुटांशुसंततचतुर्वैशार्णचित्रा
तनूः॥अंभोजारिदराह्वयौगुणकपालाख्यौचपाशांकुशेष्टाभी
तिर्दधतीभवेद्भवभयप्रोत्सारिणीतारिणी॥मुक्ताविद्रुमहेमनी
लधवलच्छायैर्मुखैरुयक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटांतत्वा
र्थवर्णात्मिकां॥ गायत्रींवरदाभयांकुशकषाशुभ्रांकपालंगुणं
शंखंचक्रमथारविंदयुगुलंहस्तैर्वहंतींभजे॥ १॥आयातुवरदा
देवीअक्षरंब्रह्मसंमितं।गायत्रींछंदसांमातेदंब्रह्मजुषस्वमे॥हंसा
रूढांसिताब्जैस्तरुणमणिलसद्भूषणांभालनेत्रां वेदास्यामक्ष
मालांसितमथकमलंदंडमभ्यादधानां॥ ध्यायेद्दोर्भिश्चतुर्भि

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

स्त्रिभुवनजननींपूर्वसंध्याभिवंद्यांगायत्रीमृक्स.वित्रीमभिनवव यसीं मंडले चंडरश्मेः २ ताक्ष्यारूढांबुजाक्षींशतमखमणिभां चक्रशंखौदधानां दोर्भिः पद्मं चतुर्भिःस्फुटसुषमगदां विश्व कर्त्रींज्वलंतीं॥आलोलांपूर्णहारांशशिरुचिरजटांवैष्णवींम ध्यमेह्निसावित्रींभावयामित्रिभुवनजननींमंडलेचंडरश्मेः।३ पंचास्यांपीतविद्युद्द्युतिरुचिरजटामंडलांचंद्रमौलिंभास्वद्भू षाभुजंगांफणिमणिविलसद्भासिभस्मांगरागां ॥ ध्यायेत्ख ट्वांगशूलामभयवरकरांव्याघ्रचर्मांबराढ्यांसायाह्नेसामवेदां त्रिनयनवृषभारूढवार्णीससूर्याम् ॥ ४ ॥ इतिध्यानंसपर्पया मि ॥ आगच्छवरदेदेविजपेमेसान्निधौभव ॥ गायं तंत्रायसेयस्माद्गायत्रीत्वंततःस्मृता ॥ ओंओजोसिसहोसि०

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

श्रियमावाहयामि ॥ मुद्राः ॥ सुमुखंसंपुटंचैववितितंविस्तृतंतं
था ॥ द्विमुखंत्रिमुखंचैवचतुष्पंचमुखंतथा ॥ षण्मुखाधोमुखं
चैवव्यापकांजालिकंतथा ॥ शकटंयमपाशंचग्रथितंचोन्मु
खोन्मुखं॥प्रलंबंमुष्टिकंचैवमत्स्यःकूर्मोवराहकः ॥ सिंहाक्रां
तंमहाक्रांतंमुद्गरंपल्लवंतथा ॥ चतुर्विंशतिसङ्ख्याकामुद्राए
ताःप्रतिष्ठिताः॥इतिमुद्रानजानातिगायत्रीनिष्फलाभवेत् ॥
इतिमुद्राःप्रदर्श्य शापविमोचनंकुर्यात् ॥ अथगायत्रीशाप
विमोचनं ॥ अस्यश्रीब्रह्मशापविमोचनमंत्रस्य ब्रह्माऋषिः॥
भुक्तिमुक्तिप्रदाब्रह्मशापविमोचनीगायत्रीशक्तिर्देवता ॥ गा
यत्रीछंदः ॥ ब्रह्मशापविमोचनार्थंजपेविनियोगः गायत्रीब्रह्मे
त्युपासीतयद्रूपंब्रह्मविदोविदुः ॥ तांपश्यंतिधीराःसुमनसा

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

वाचमकृत ॥ वेदात्मनायविद्महेहिरण्यगर्भायधीमहि ॥ त
न्नोब्रह्मप्रचोदयात् ॥ ओंदेविभगवतिगायत्रीत्वंब्रह्मशापाद्वि
मुक्ताभव ॥ ओंअस्यश्रीवसिष्ठशापविमोचनमंत्रस्य ॥ नि
ग्रहानुग्रहकर्तावसिष्ठऋषिः ॥ त्रिष्टुप्छंदः ॥ वसिष्ठानुगृही
तागायत्रीशक्तिर्देवता ॥ वसिष्ठशापविमोचनार्थंजपेविनियो
गः ॥ सोहमर्कपरंज्योतिरर्कज्योतिरहंशिवः ॥ आत्मज्यो
तिरसावहम् ॥ इत्युक्त्वायोनिमुद्रांसंदर्शयेत् ॥ ओंदेविभ
गवतिगायत्रित्वंवसिष्ठशापाद्विमुक्ताभव ॥ ओंअस्यश्री
विश्वामित्रशापविमोचनमंत्रस्यनूतनसृष्टिकर्ताविश्वामित्रऋ
षिः ॥ वाग्देहागायत्रीछंदः ॥ विश्वामित्रानुगृहीतागाय
त्रीशक्तिर्देवता ॥ विश्वामित्रशापविमोचनार्थंजपेविनियो

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

गः ॥ गायत्रींभजाम्यग्निमुखांविश्वगर्भांयदूद्भवां ॥ देवाश्च
क्रेविकृष्टितांकल्याणीमिष्टकरींप्रपद्ये ॥ यन्मुखान्निसृतोखि
लवेदगर्भः ॥ गायत्रीत्रयंपठित्वा ॥ देविभगवतिगायत्रित्वं
विश्वामित्रशापाद्विमुक्ताभव ॥ ओंअस्यश्रीवरुणशापविमो
चनमंत्रस्यपायुर्भारद्वाजऋषिः ॥ त्रिष्टुप्छंदः ॥ वरुणानु
गृहीतागायत्रीशक्तिर्देवता ॥ वरुणशापविमोचनार्थेजपेवि
नियोगः ॥ तिग्मायुधौतिग्महेतीसुशेवौसोमारुद्राविहसुमृ
ळतंनः ॥ प्रनोमुंचतंवरुणस्यपाशाद्गोपायतंनःसुमनस्यमा
ना ॥ ओंधाम्नोधाम्नोराजन्नितोवरुणनोमुंच ॥ ओंनदेविभ
गवतिगायत्रित्वंवरुणशापाद्विमुक्ताभव ॥ शापयुक्तातुयासं
ध्यानफलातुकदाचन ॥ शापादुत्तारितासंध्याभुक्तिमुक्ति

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

गा० फलप्रदा ॥ मानसपंचोपचारपूजांकुर्यात् ॥ मूलमंत्रेण ॥ पु०
लंपृथिव्यात्मनेनारायणायनमः गंधं ॥ हंआकाशात्मने
१० वासुदेवायनमः ॥ पुष्पं ॥ यं वाय्वात्मनेसंकर्षणायनमः ॥
धूपम् ॥ रं अग्न्यात्मनेप्रद्युम्नायनमः॥ दीपम् ॥ अमृतात्मने
अनिरुद्धायनमः ॥ नैवेद्यम् ॥ ओंयंरंलंवंहंपंचतत्त्वात्मनेन
मः॥मंत्रपुष्पम् ॥ मालाप्रार्थना॥ओंमहामालेमहामायेसर्वश
क्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदा
भव ॥ ओंअविघ्नंकुरुमालेत्वम् ॥ इतिमालामादायहृदयस
मीपेधारयन् ॥ सवितारंध्यायन्एकाग्रचित्तेनमध्यमांगुष्ठम
ध्यपर्वणिनिधाय ॥ उन्नतगात्रः प्रणवव्याहृतिपूर्वकं गाय १०
त्रीमंत्रमुच्चारयन्मध्यदिनावधिजपेत् सार्धप्रहरांतमत्वरया॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

विश्वामित्रऋषिः गायत्रीछंदः ॥ सवितादेवता ॥ जपेविनि
योगः अंतेपुनःप्रणवमुच्चार्य ॥ अष्टाक्षरींपंचाक्षरींचाद्विगुणां
त्रिगुणांजपसिद्ध्यर्थंजपेदित्युक्तमाचार्यैः सूत्रेनतुहवनामिति
विसर्जनम्॥त्वंमालेसर्वदेवानांप्रीतिदाशुभदाभव॥श्रियंकुरु
ष्वमेभद्रेयशोवीर्यंचसर्वदा ॥ इतिमालांशिरसिधारयन्त्रिः
प्राणानायम्य पुनःषडंगंकृत्वामुद्रांप्रदर्शयेत् ॥ सुरभिज्ञा
नशंखंचयोनिःकूर्मोंथपंकजम्॥ लिंगंनिर्वाणमुद्रांचजपांतेष्टौ
प्रदर्शयेत् ॥ उत्तमेशिखरेजातेभूम्यांपर्वतमूर्धनि ॥ ब्राह्मणे
भ्योभ्यनुज्ञातागच्छदेवियथासुखं ॥ इतिविसृज्यजपमीश्वरा
र्पणंकुर्यात् ॥ यज्जाग्रतइतिषण्मत्रान्त्रिःपठित्वाप्रत्यहंशयी
तइति ॥ अथमालासंस्कारः॥ कुशोदकसहितैःपंचगव्यैःमा

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

लंप्रक्षाल्यओंह्रींअंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः कं
खंगंघंङं चंछंजंझंञं टंठंडंढंणं तंथंदंधंनं पंफंबंभंमं यंरंलंवंशंषं
संहंळंक्षं इत्येतानिमातृकाक्षराणिअश्वत्थपर्णस्थापितमाला
यां विन्यस्यसद्योजातमितिपंचमंत्रान्जपित्वा ॥ एतेषां
मध्येप्रथमेनसद्योजातमितिमंत्रेण शीतलजलेनप्रक्षाल्यद्वि
तीयमंत्रेण वामदेवेति चंदनकस्तूर्यादिना लेपयित्वा पंचम
मंत्रेणप्रतिमणिशतसंख्ययाभिमंत्रयेत् ॥ अघोरेभ्यइतिमंत्रे
णमेरुंशतवारंमंत्रयेत् इतिमालासंस्कारः ॥ एवंजपंकृत्वाज
पसमाप्तौगृह्योक्तविधिनाअग्निंप्रतिष्ठाप्यग्रहावाहनादिकलश
प्रार्थनांतंकृत्वा चक्षुषीआज्येनेत्यंतेआदित्यादिनवग्रहान्अ
र्कसमिधादिभिश्चवाज्यद्रव्यैःअष्टोत्तरशतसंख्ययायक्ष्ये ॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

लोकपालान् तत्तद्देवतानामन्वाधानंकृत्वा सवितारं चतु
र्विंशतिसहस्रं तिलाहुतिभिस्त्रिसहस्रं पायसाहुतिभिस्तावती
भिर्घृताहुतिभिस्तावतीभिर्दूर्वाहुतिभिस्तावतीभिःक्षीरद्रुम
समिधाहुतिभिश्चशेषेणस्विष्टकृतमित्यादिचरुपायसतिलैः
सहाज्यस्यपर्यग्निकृत्वा ॥ होमकालेसवित्रादिभ्यइदंनममेति
त्यागः ॥ दूर्वात्रयेणैकाहुतिर्दूर्वात्रयेदधिमध्वंजनंकार्यं ॥
कालेबलिदानादिदत्त्वासमुद्रज्येष्ठेत्यादिइमंमेइत्याभिषेकांते
प्रत्ययुतंधेनुंदत्वाततोविर्जनादिब्राह्मणभोजनंसंकल्पयंति॥
वायनत्रयंचदद्याद्गायत्रीसावित्रीसरस्वतीप्रीत्यर्थं ॥ ततोक
लशदानानिईश्वरार्पणंकुर्यात् ॥ होमसमाप्तौजलेदेवंसंपूज्य
होमदशांशेनगायत्र्यंतेसवितारंतर्पयामीतितर्पणंकार्यं॥ तर्प

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

णदशांशेनगायत्र्यंतेआत्मानमभिषिंचामि तत्रइतिकुंभमुद्र
यास्वमूर्धनिअभिषेकःकार्यः ॥ होमतर्पणानांमध्येयदेवंन
संभवतितत्स्थानेद्विगुणोजपःकार्यः ॥ ततोऽभिषेकदशांशे
नब्राह्मणान्भोजयेत् ॥ ततोब्राह्मणान्दक्षिणादिभिःपरितो
ष्य ॥ ततआशिषोगृहीत्वाचतुर्विंशतिलक्षात्मकम् ॥ गाय
त्रीपुरश्चरणं संपूर्णमस्त्वितिभवंतोब्रुवंतु ॥चतुर्विंशतिलक्षगा
यत्रीपुरश्चरणंसंपूर्णमस्तु ॥ततःकर्ता प्रारंभमारभ्यसमाप्तिप
र्यंतंहविष्याशीसत्यवागधःशायीभवेत्॥पारिजातादाहृते ॥
दशदानंचगोदानंकन्यादानंतथैवच ॥ भूदानंगृहदानंचम
हादानानिषोडश ॥ ऋग्विधाने ॥ वेदादीनांचगीतायाः प्र
सादजननेविधिं ॥ गायत्र्यासंप्रवक्ष्यामिधर्मकामार्थमोक्षदं॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

मध्याह्नेमितभुग्मौनीत्रिःस्नानार्चनतत्परः ॥ जपेल्लक्षजपंधी
मान्नान्यद्दङ्गमानसक्रियाइति ॥ लक्षपुरश्चरणमुच्यते ॥
कलौचतुर्गुणोजपोविहितः ॥ अतोद्वादशलक्षैःपुरश्चरणंभ
वति ॥ तत्रसंकल्पस्तथैवोह्यः द्वादशलक्षात्मकंपुरश्चरणंक
रिष्येइति ॥ सवितारंद्वादशसहस्रतिलाहुतिभिः ॥ इति गा
यत्रीपुरश्चरणविधिःसमाप्तः ॥ ६ ॥ यत्किंचित्पुराणमध्ये
देशकालनियमाः ॥ पर्वताग्रेनदीतीरेबिल्वमूलेजलाशये ॥
गोष्ठेदेवालयेऽश्वत्थेउद्यानेतुलसीवने ॥ १ ॥ पुण्यक्षेत्रेगुरोः
पार्श्वेचित्तैकांतस्थलेपिवा ॥ पुरश्चरणकंमंत्रीसिद्ध्यत्येवनं
संशयः ॥ २ ॥ क्षीराहारःफलाशीवा शाकाशीवाहविष्यभु
क् ॥ भिक्षाशीवाजपेन्मंत्रंकृच्छ्रचांद्रायणादिकृत् ॥ ३ ॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

श्रुतिस्मृतिविरोधंचजपंरात्रौविवर्जयेत् ॥ भूशय्यांब्रह्मचा
रित्वंमौनचर्यानसूयता ॥ ४ ॥ लवणक्षारमाम्लंचव्यं
जनंकांस्यभोजनं ॥ तांबूलंचाद्विभुक्तंचदुःसंवादंप्रमत्तता ॥
॥ ५ ॥ ननित्यपेवणंस्नानंक्षुद्रकर्मविवर्जितम् ॥ नित्यादनं
नित्यपूजादेवतास्तुतिकीर्तनम् ॥ नैमित्तिकार्चनंचैवविश्वा
सोगुरुदेवयोः ॥ ६ ॥ जपनिष्ठाद्वादशैतेधर्माःस्युर्मंत्रसि
द्धिदाः ॥ नित्यंसूर्यमुपस्थायतस्यचाभिमुखेयजेत् ॥ ७ ॥
देवतांप्रतिमादौवावह्नौवाभ्यर्च्यतन्मनः ॥ अनिर्वेदनया
व्यग्रःशास्त्रोक्ताचारपालकः ॥ ८ ॥ स्नानपूजाजपध्यान
होमतर्पणतत्परः ॥निष्कामोदेवतानांचसर्वकर्मनिवेदकः ॥
॥ ९ ॥ एवमादींश्चनियमान्पुरश्चरणकेचरेत् ॥ अथध्या

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

नम्॥ ब्रह्माणीचतुराननाक्षवलयाकुंभंकरेस्रुक्स्रुवौ बिभ्राणा
तरुणेंदुकांतिवदनाऋग्रूपिणीबालिका ॥ हंसारोहणकेलिरं
बरमणेर्बिंबार्चिताभूतिदागायत्रीहृदिभाविताभवतुनःसंपत्स
मृद्ध्यैसदा ॥ १ ॥ रुद्राणीनवयौवनात्रिनयनावैयाघ्रचर्मां
बरा खट्वांगत्रिशिखाक्षसूत्रवलयाभीतिश्रियैचास्तुनः॥ बिभ्र
द्वामजटाकलापविलसद्बालेंदुमौलिर्मुदासावित्रीतनयारमा
सिततनुर्ध्येयायजूरूपिणी ॥ २ ॥ ध्येयासाचसरस्वतीभगव
तीपीतांबरालंकृताश्यामासामतनुर्जपाकुसुमयुद्धामार्चिता
वैष्णवी ॥ तार्क्ष्यस्थाफणिनुपूरांगदलसद्ग्रैवेयभूषोज्ज्वलाह
स्तालंबितशंखचक्रसुगदाभीतिश्रियैचास्तुनः ॥३॥ इति ।

इदं पुस्तकं मुंबय्यां श्रीकृष्णदासात्मजेन क्षेमराजेन स्वकीये
"श्रीवेङ्कटेश्वर" यंत्रालये मुद्रितम् । शके १८२२, संवत् १९५७.

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

विक्रय्य पुस्तकें ।

नाम.	की. रु. आ.
शाक्तप्रमोददशमहाविद्या और पांचों देवतोंका पंचांग द्वादशांग सहित इसमें १८४ विषयहैं शाक्त लोगोंको अवश्य लेना चाहिये ...	६—०
नित्यतंत्रभाषाटीका (नैमित्तिककर्ममें उपयोगी)	०—१२
मंत्रमहोदधि सटीक सटिप्पण मातृका कोष तथा अनुष्ठानिकयंत्रों समेत	३—८
महानिर्वाणतंत्रम् भाषाटीकासमेतम् चौंसठ तंत्रोंमें सर्वतंत्रोत्तमो त्तम है	२—४

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

नाम.	की. रु. आ.
माहेश्वरीतंत्र भाषाटीका (मारण मोहन वशीकरण उच्चाटनादि विधि वर्णितहै) ...	०—४
सौभाग्यलक्ष्मी भाषाटीका	०—६
हनुमदुपासना (सांगोपांग हनुमदाराधन) जिसमें पंचमुखी एकादशमुखी हनुमत्कवच हनुमत्सहस्रनाम आदि (३४) विषय हैं अत्युत्तमरेशमी गुटका	१—८
इन्द्रजाल (संस्कृत और भाषा मंत्र तंत्र मोहन उच्चाटन वशीकरण प्रयोग औरवैद्यक तथा समस्त कार्योंके सिद्धकरनेवाले १३८ यंत्रों समेत ...	०—१२

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

जा०

नाम.		की. रु. आ.
दुर्गासप्तशती सातटीका समेत	...	३—०
दुर्गोपासना कल्पद्रुम ...	...	३—८
दुर्गासप्तशती शान्तनवीटीकासहित	...	१—४
दुर्गासप्तशती भाषाटीका ...	...	१—०
तथा रफ़ूकागज	...	०—१२
दुर्गासप्तशती ७ पंक्तिकी जिल्दबँधी	...	१—०
दुर्गापाठ भाषापद्य अनन्यकविकृत	...	०—६
दुर्गासप्तशती ३२ पेजी गुटका	...	०—१०
तथा खुला पत्रा	...	०—७
दुर्गासप्तशती छोटा गुटका बारीक	...	०—३

रा०

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri